भवति एवं प्राचीनावीती भवति” इति। प्रतिष्ठापयति यज्ञोपवीतमिति शेषः। तथाचामरसिंहोऽपि “उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे। प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितम्” इति। “सावित्री ग्रन्थिसंयुक्तं उपवीतं तवाच्युत” इति ब्रह्मपुराणीय पूजादर्शनात्। गायत्रीमन्त्रेण उपवीतं कर्तव्यमिति प्रतीयते। लौकिकास्तु सावित्रीग्रन्थिरिति वदन्ति प्रवरसंख्यया वेष्टितग्रन्थिरिति लौकिकव्यवहारः। विद्याकरधृतं “यथा यज्ञोपवीतम्”। इत्यादिवाक्यात् उत्तरीयमपि यज्ञोपवीतवत् सव्यापसव्यत्वादिना धार्य्यं विवृतं शुद्धितत्त्वे। पित्रादीत्यादिना मातामहादि त्रयपरिग्रहः। तथाच विष्णुपुराणे “त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत्। ऋषीणाञ्च यथान्यायं सकृच्चापि प्रजापतेः। पितृणां प्रीणनार्थाय त्रिरपः पृथिवीपते!। पितामहेभ्यश्च तथा प्रीणयेत् प्रपितामहान्। मातामहाय तत् पित्रे तत्पित्रे च समाहितः। दद्यात् पित्रेण तीर्थेन काम्यञ्चान्यत् शृणुष्व मे”। स्मृतिसारे धृतम् “वामहस्ते तिलान् दत्त्वा जलमध्ये तु तर्पयेत्। स्नानसाद्यञ्जले पात्रे रोमकूपे न कुत्रचित्”! जलतर्पणे रोमरहितप्रदेशे वामबाहौ वस्त्राच्छादिते तिलान् संस्थाप्य मुद्रारहितदक्षिणहस्ततर्ज्जन्यङ्गुष्ठयोरन्यतरेण तिलान् गृहीत्वा वामहस्ततलेन स्थापयित्वा तर्पयेदिति मदनपारिजातः। अतएव मरीचिः “मुक्तहस्तञ्च दातव्यं न मुद्रां दर्शयेत् क्वचित्। वामहस्ते तिला ग्राह्या मुक्तहस्तञ्च दक्षिणम्”। मुक्तहस्तं प्रसारितहस्तं यथा स्यात्! एवं मुद्रा प्रदेशिन्यङ्गुष्ठयोगे सन्दंशरूपः। मुक्तहस्तञ्च दक्षिणम्” इति दक्षिणहस्तं तिलरहितं कुर्य्यात् इति नैयतकालीनकल्पतरुः। तथाच नारदीये “अङ्गुष्ठानामिकाभ्यान्तु दक्षिणस्येतरस्थितान्। तिलान् गृहीत्वा पात्रस्थान् ध्यात्वा संतर्पयेत् पितॄन्”। देवलः। “रोमसंस्थान् तिलान् कृत्वा यस्तु संतर्पयेत् पितॄन्। पितरस्तर्पितास्तेन रुधिरेण मलेन च”। वृष्टिजलसम्पर्के तर्पणनिषेधमाह वायुपुराणम् “मेघे वर्षति यः कुर्य्यात् तर्पणं ज्ञानदुर्बलः। पितॄणां नरके घोरे गतिस्तस्य भवेद्ध्रुवम्”। तथा “शूद्रोदकैर्न कुर्वीत तथा मेघादिनिःसृतैः”। इति मेघादिदर्शनादिति कौमुदी। योगियाज्ञवल्क्यः “यदुद्धृतं जलञ्चेत्तु तिलान् संमिश्रयेज्जले। अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः”। अत्र शेषार्द्धं मनदपारिजाते लिखितम्। “अन्यथा वामहस्तेन” ततस्तर्पणमाचरेदिति”। वायुपुराणम्। “तिलदर्भैस्तु संयुक्तं श्रद्धया यत् प्रदीयते। तत्सर्वममृतं भूत्वा पितॄणामुपतिष्ठते”। स्मृतिः “रविशुक्रदिने चैव द्वादश्यां श्राद्धवासरे। सप्तम्यां जन्मदिवसे न कुर्य्यात्तिलतर्पणम्”। मत्स्यपुराणे “संक्रान्त्यां निशि सप्तम्यां रविशुक्रदिने तथा। श्राद्धे जन्मदिने चैव न कुर्य्यात्तिलतर्पणम्”। श्राद्धे अमावास्यातिरिक्तश्राद्धे “नीलषण्डविमोक्षेण अमावास्यां तिलोदकैः। वर्षासु दीपदानेन पितॄणामनृणो भवेत्। अमावास्यान्तु ये मर्त्याः प्रयच्छन्ति तिलोदकम्। पात्रमौडुम्बरं प्राप्य मधुमिश्रं तपोधनाः!। कृतं भवति तत् श्राद्धं रहस्यञ्च सदा भवेत्। विशेषतश्च जाह्नव्यां सर्वदा तर्पयेत् पितॄन्। न कालनियमस्तत्र क्रियते सर्वकर्मसु”। बौधायनः “न जीवत्पितृकः कृष्णैस्तिलैस्तर्पणमाचरेत्। सप्तम्यां रविवारे च जन्मर्क्षदिवसेषु च”। स्मृतिः “निषिद्धदिनमासाद्य यः कुर्य्यात्तिलतर्पणम्। रुधिरं तद्भवेत्तोयं दाता च नरकं व्रजेत्”। प्रतिप्रसवमाह स्मृतिः “अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च। उपाकर्मणि चोत्सर्गे युगादौ मृतवासरे। सूर्य्यशुक्रादिवारेऽपि न दोषस्तिलतर्पणे। तीर्थे तिथिविशेषे च कार्य्यं प्रेते च सर्वदा”। स्कन्दपुराणम् “तीर्थमात्रे तु कर्तव्यं तर्पणं सतिलोदकैः। योऽन्यथा तर्पयेन्मूढः स विष्ठायां भवेत् कृमिः। विशेषतस्तु जाह्नव्यां सर्वदा तर्पयेत् पितॄन्”। एतत्तु निषिद्धदिनतर्पणविधायकम्। “तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके। निषिद्धेऽपि दिने कुर्य्यात्तर्पणं तिलमिश्रितम्” इति मदनपारिजातविद्याकरराजमार्तण्डधृतमरीचिवचनात्। तिलाभावे पितृतीर्थेन प्रतिनिधिना तर्पणम् “तिलानामप्यभावे तु सुवर्णरजतान्वितम्। तदभावे निषिञ्चेत्तु दर्भैस्तोयैर्न चान्यथा” इति याज्ञवल्क्यात्। सुवर्णरजतान्वितं सुवर्णरजतस्पृष्टम्। अतएव “सुलभं सकलं पुण्यं यज्ञदानादिजं फलम्। गङ्गातोयैश्च सतिलैर्दुर्लभं पितृतर्पणम्” इति भविष्यपुराणे गङ्गातोयस्य दुर्लभत्वमुक्तम्. न च तदभावात्तर्पणाभावः शातातपः “पितॄणां पितृतीर्थेन जलं सिञ्चद्यथो-